## वोताप्योः । (१४१/२७९८)

भूते लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति सर्वमनुवर्तते । वा आ उताप्योः वोताप्योः । मर्यादायाम् [1]अयमाङ्, नाभिविधौ । 'उताप्योः समर्थयोर्लिङ्' (३.३.१५२/२८०९) इति वक्ष्यति । प्रागेतस्मात् [2]सूत्रावधेः यदित ऊर्ध्वमनुक्रमिष्यामः, तत्र भूते लिङ्निमित्ते क्रियातिपत्तौ लृङ् वा भवति इत्येतदधिकृतं वेदितव्यम् । वक्ष्यति, 'विभाषा कथमि लिङ् च' (३. ३. १४३/२८००) – कथं नाम तत्रभवान् वृषल[3]मयाजयिष्यत् । यथाप्राप्तं च – [4]याजयेत् ॥

## गर्हायां लडपिजात्वोः । (१४२/२७९९)

गर्हा[5] कुत्सा इत्यनर्थान्तरम् । गर्हायां गम्यमानायाम् [6]अपिजात्वोः उपपदयोः धातोः लट् प्रत्ययो भवति । वर्तमाने लट् (३. २. १२३/२१५१) उक्तः कालसामान्ये न प्राप्नोति इति विधीयते । कालविशेष[7]विहितांश्चापि [8]प्रत्ययानयं परत्वाद् [9]अस्मिन् विषये बाधते । अपि तत्रभवान् वृषलं याजयति, जातु तत्रभवान् वृषलं याजयति, गर्हामहे, [10]अहो अन्याय्यमेतद् । लिङ्निमित्ताभावादिह क्रियातिपत्तौ लृङ् न भवति ॥

## विभाषा कथमि लिङ् च । (१४३/२८००)

गर्हायाम् इति वर्तते । कथमि उपपदे गर्हायां गम्यमानायां धातोः लिङ् प्रत्ययो भवति, चकाराल् [11]लट् च । विभाषाग्रहणं [12]यथास्वं कालविषये विहितानाम्[13] अबाधनार्थम् । कथं नाम तत्रभवान् वृषलं याजयेत्, कथं नाम तत्रभवान् वृषलं याजयति । कथं नाम तत्रभवान् वृषलं याजयिष्यति । कथं नाम तत्रभवान् वृषलं याजयिता । [14]कथं नाम तत्रभवान् वृषलं याजयेत् । कथं नाम तत्रभवान् वृषलमयाजयत् । कथं नाम तत्रभवान् वृषलं याजयांचकार । अत्र लिङ्निमित्तमस्ति इति भूतविवक्षायां क्रियातिपत्तौ वा लृङ्[15] । भविष्यद्विवक्षायां [16]सर्वत्र नित्येनैव [17]लृङा भवितव्यम् ॥

## किंवृत्ते लिङ्लृटौ । (१४४/२८०१)

गर्हायाम् इत्येव । विभाषा न स्वर्यते । किंवृत्ते उपपदे गर्हायां गम्यमानायां धातोः लिङ्लृटौ प्रत्ययौ भवतः । सर्वलकाराणामपवादः । लिङ्ग्रहणं लटो[18]ऽपरिग्रहार्थम् । को नाम[19] वृषलो यं तत्रभवान् याजयेत्, यं तत्रभवान् वृषलं याजयिष्यति । कतरो नाम, कतमो नाम यं तत्रभवान् वृषलं याजयेत्, याजयिष्यति । भूते क्रियातिपत्तौ वा लृङ्[20] । भविष्यति [21]तु नित्यम् । को नाम वृषलो यं तत्रभवान् अयाजयिष्यत् ॥

---

1. अयम् नास्ति फ. ह. 2. सूत्रादवधेः ब. 3. अयाजयत् फ. 4. याजयेत् नास्ति अ. ब, भवति फ.
5. निन्दा कुत्सनेत्य° फ. 6. अपि जातु इत्येतयोः अ. ह. 7. विहिताः प्रत्ययादयः ह, अपि नास्ति क. फ. 8. प्रत्य–
यान्तरम् फ. 9. तस्मिन् फ. 10. अहो नास्ति क. 11. लिट् ह. 12. यथाकालविहितानाम् फ. ह.
13. प्रत्ययानाम् इत्यधिकम् फ. 14. वाक्यमिदं नास्ति फ. 15. भवति इत्यधिकम् फ. ह. 16. तु इत्यधिकम्
फ. ह. 17. लृटा ह. 18. परिहारार्थम् ब, निवृत्त्यर्थम् क. ह. 19. अत्र इत्यधिकम् ह. 20. भवति इत्यधिकम्
.फ 21. तु नास्ति फ.